## वेः स्कन्देरनिष्ठायाम् । (७३/२३९८)

वेः उपसर्गादुत्तरस्य [1]स्कन्देः सकारस्य [2]मूर्धन्यो [3]वा भवति अनिष्ठायाम् । विष्कन्ता, विस्कन्ता । विष्कन्तुम्, विस्कन्तुम् । विष्कन्तव्यम्, विस्कन्तव्यम् । अनिष्ठायाम् इति किम् ? विस्कन्नः[4] ॥

## परेश्च । (७४/२३९९)

[5]परिशब्दादुत्तरस्य [6]स्कन्देः सकारस्य वा [7]मूर्धन्यो भवति । परिष्कन्ता । परिष्कन्तुम् । परिष्कन्तव्यम् । परिस्कन्ता । परिस्कन्तुम । परिस्कन्तव्यम् । पृथग्योगकरणसामर्थ्यात् अनिष्ठायाम् इत्येतन्नानुवर्तते । परिष्कण्णः, परिस्कन्नः ॥

## परिस्कन्दः प्राच्यभरतेषु । (७५/३०२६)

परिस्कन्दः इति [8]मूर्धन्याभावो निपात्यते प्राच्यभरतेषु प्रयोगविषयेषु । पूर्वेण मूर्धन्ये प्राप्ते तदभावो निपात्यते । परिस्कन्दः । [9]अन्यत्र परिष्कन्दः । अचि निपातनम् । अथ वा निष्ठातकारस्य लोपः । भरतग्रहणं प्राच्यविशेषणम् ॥

## स्फुरतिस्फुलत्योर्निर्निविभ्यः । (७६/२६३७)

[10]स्फुरतिस्फुलत्योः सकारस्य निस् नि वि इत्येतेभ्यः [11]उत्तरस्य वा मूर्धन्यादेशो भवति । स्फुरति – निष्ष्फुरति, निस्स्फुरति । निष्फुरति, निस्फुरति । विष्फुरति, विस्फुरति । स्फुलति – निष्ष्फुलति, निस्स्फुलति । निष्फुलति, निस्फुलति । विष्फुलति, विस्फुलति ॥

## वेः स्कभ्नातेर्नित्यम् । (७७/२८५६)

वेः उत्तरस्य स्कभ्नातेः सकारस्य नित्यं मूर्धन्यादेशो भवति । [12]विष्कभ्नाति । विष्कम्भिता । विष्कम्भितुम् । विष्कम्भितव्यम् ॥

## इणः षीध्वंलुङ्लिटां धोऽङ्गात् । (७८/२२४७)

मूर्धन्यः इति वर्तते । इणन्तादङ्गात् [13]उत्तरेषां षीध्वंलुङ्लिटां [14]यो धकारः तस्य मूर्धन्यादेशो भवति । [15]च्योषीढ्वम्, प्लोषीढ्वम् । लुङ – अच्योढ्वम् । अप्लोढ्वम् । लिट् – चकृढ्वे[16] । ववृढ्वे । इण्कोः (८.३.५७/२११) इति वर्तमाने पुनरिण्ग्रहणं कवर्गनिवृत्त्यर्थम् । पक्षीध्वम् । यक्षीध्वम् । षीध्वंलुङ्लिटाम् इति किम् ? स्तुध्वे । अस्तुध्वम् । अङ्गात् इति किम् ? परिवेविषीध्वम् । अर्थवद्ग्रहणादपि सिद्धम् ? [17]तत्तु नाश्रितम्[18] ॥

---

1. स्कन्दतेः इ. 2. मूर्धन्यादेशः ब. क. इ. ह. 3. वा नास्ति क. 4. विष्कन्नवान् इत्यधिकम् ड.
5. वाग्रहणम् अनुवर्तते इत्यधिकम् क.इ.ह, परेः उत्तरस्य ब. 6. स्कन्दतेः इ. 7. मूर्धन्यादेशः ब.क.इ.ह. 8. मूर्धन्याभावः नास्ति ब ड. 9. प्राच्यभरतेषु इति किम् ? पूर्वेणात्र विकल्पः, परिष्कन्दः, परिस्कन्दः इत्यधिकम् ब.क.ड. इ. ह. 10. स्फुरति स्फुलति इत्येतयोः इ. 11. परस्य ब. क. 12. विष्कभ्नाति नास्ति ब. ड. इ. ह.
13. परेषां क. ड. 14. धकारस्य ब. 15. स्तोषीढ्वम् ड. 16. ववृढ्वे नास्ति ब. इ. 17. एतत्तु ब.
18. अङ्गग्रहणं विस्पष्टार्थम् इत्यधिकम् ड.